# devIsukta (Rigveda)

# દેવીસૂક્તં અથવા વાગામ્ભૃણીસૂક્તં ઋગ્વેદાન્તર્ગતમ્

## Document Information

Text title : devIsukta (Rigveda)

File name : deviisuukta.itx

Category : sUkta, veda, svara, rigveda, devI

Location : doc_veda

Transliterated by : Rekha Venkatesh, Dhruba Chakroborty

Proofread by : Rekha Venkatesh, Paulo Santos

Latest update : May 31, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 22, 2022

*sanskritdocuments.org*

# દેવીસૂક્તં અથવા વાગામ્ભૃણીસૂક્તં ઋગ્વેદાન્તર્ગતમ્

ઋષિઃ વાગામ્ભૃણી, દેવતા વાગામ્ભૃણી, છન્દઃ ૧, ૩, ૭, ૮ વિરાટ્ત્રિષ્ટુપ્,
૨ પાદનિચૃજ્જગતી, ૪, ૫ ત્રિષ્ટુપ્, ૬ નિચૃત્ત્રિષ્ટુપ્,
સ્વરઃ ૧, ૩-૮ ધૈવતઃ, ૩ નિષાદઃ

॥ અથ દેવીસૂક્તમ્ ॥

ૐ અહં રુદ્રેભિર્વસુભિશ્ચરામ્યહમાદિત્યૈરુત વિશ્વદેવૈઃ ।
અહં મિત્રાવરુણોભા બિભર્મ્યહમિન્દ્રાગ્ની અહમશ્વિનોભા ॥ ૧॥

અહં સોમમાહનસં બિભર્મ્યહં ત્વષ્ટારમુત પૂષણં ભગમ્ ।
અહં દધામિ દ્રવિણં હવિષ્મતે સુપ્રાવ્યે એ ૩ યજમાનાય સુન્વતે ॥ ૨॥

અહં રાષ્ટ્રી સંગમની વસૂનાં ચિકિતુષી પ્રથમા યજ્ઞિયાનામ્ ।
તાં મા દેવા વ્યદધુઃ પુરુત્રા ભૂરિસ્થાત્રાં ભૂર્યા વેશયન્તીમ્ ॥ ૩॥

મયા સોઽઅન્નમત્તિ યો વિપશ્યતિ યઃ પ્રાણિતિ ય ઈં શૃણોત્યુક્તમ્ ।
અમન્તવોમાન્ત ઉપક્ષિયન્તિ શ્રુધિશ્રુત શ્રદ્ધિવં તે વદામિ ॥ ૪॥

અહમેવ સ્વયમિદં વદામિ જુષ્ટં દેવેભિરુત માનુષેભિઃ ।
યં કામયે તં તમુગ્રં કૃણોમિ તં બ્રહ્માણં તમૃષિં તં સુમેધામ્ ॥ ૫॥

અહં રુદ્રાય ધનુરાતનોમિ બ્રહ્મદ્વિષે શરવેહન્ત વા ઉ ।
અહં જનાય સમદં કૃણોમ્યહં દ્યાવાપૃથિવી આવિવેશ ॥ ૬॥

અહં સુવે પિતરમસ્ય મૂર્ધન્ મમ યોનિરપ્સ્વ (અ) ૧ન્તઃ સમુદ્રે ।
તતો વિતિષ્ઠે ભુવનાનુ વિશ્વો તામૂં દ્યાં વર્ષ્મણોપસ્પૃશામિ ॥ ૭॥

અહમેવ વાતઽઇવ પ્રવામ્યારભમાણા ભુવનાનિ વિશ્વા ।
પરો દિવા પરએના પૃથિવ્યૈ તાવતી મહિના સમ્બભૂવ ॥ ૮॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઋગ્વેદ ૧૦-૧૨૫

॥ અથ સ્વરરહિતદેવીસૂક્તમ્ ॥

ૐ અહં રુદ્રેભિર્વસુભિશ્ચરામ્યહમાદિત્યૈરુત વિશ્વદેવૈઃ ।
અહં મિત્રાવરુણોભા બિભર્મ્યહમિન્દ્રાગ્ની અહમશ્વિનોભા ॥ ૧॥

અહં સોમમાહનસં બિભર્મ્યહં ત્વષ્ટારમુત પૂષણં ભગમ્ ।
અહં દધામિ દ્રવિણં હવિષ્મતે સુપ્રાવ્યે એ૩ યજમાનાય સુન્વતે ॥ ૨॥

અહં રાષ્ટ્રી સંગમની વસૂનાં ચિકિતુષી પ્રથમા યજ્ઞિયાનામ્ ।
તાં મા દેવા વ્યદધુઃ પુરુત્રા ભૂરિસ્થાત્રાં ભૂર્યા વેશયન્તીમ્ ॥ ૩॥

મયા સોઽઅન્નમત્તિ યો વિપશ્યતિ યઃ પ્રાણિતિ ય ઈં શૃણોત્યુક્તમ્ ।
અમન્તવોમાન્ત ઉપક્ષિયન્તિ શ્રુધિશ્રુત શ્રદ્ધિવં તે વદામિ ॥ ૪॥

અહમેવ સ્વયમિદં વદામિ જુષ્ટં દેવેભિરુત માનુષેભિઃ ।
યં કામયે તં તમુગ્રં કૃણોમિ તં બ્રહ્માણં તમૃષિં તં સુમેધામ્ ॥ ૫॥

અહં રુદ્રાય ધનુરાતનોમિ બ્રહ્મદ્વિષે શરવેહન્ત વા ઉ ।
અહં જનાય સમદં કૃણોમ્યહં દ્યાવાપૃથિવી આવિવેશ ॥ ૬॥

અહં સુવે પિતરમસ્ય મૂર્ધન્ મમ યોનિરપ્સ્વ અન્તઃ સમુદ્રે ।
તતો વિતિષ્ઠે ભુવનાનુ વિશ્વો તામૂં દ્યાં વર્ષ્મણોપસ્પૃશામિ ॥ ૭॥

અહમેવ વાતઽઇવ પ્રવામ્યારભમાણા ભુવનાનિ વિશ્વા ।
પરો દિવા પરએના પૃથિવ્યૈ તાવતી મહિના સમ્બભૂવ ॥ ૮॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

Encoded and proofread by Rekha Venkatesh
Dhruba Chakroborty

*devIsukta (Rigveda)*

pdf was typeset on January 22, 2022

Please send corrections to *sanskrit@cheerful.com*